# ॥ अथ बह्वृचसन्ध्याप्रयोगः ॥

## ऋग्वेदीया प्रातःसन्ध्यापद्धतिः ।

बहिर्ग्रामात्प्राच्यामुदीच्यां वान्यस्यां दिश्यनिन्दितायामनल्पमुदकाशयमेत्य प्रातः यज्ञोपवीती शुचिर्भूतः पाणिपादमुखानि प्रक्षाल्य शुचौ देशे भूमिष्ठपादोऽनपाश्रित[1] उपविष्टः प्राङ्मुख उदङ्मुखो वा शिखां बद्ध्वा दक्षिणं पाणिमूर्वोरन्तरे कृत्वा सव्यञ्च सोपग्रहं प्रकृतिस्थमफेनाबुद्बुदमनुष्णमीक्षितमुदकं दक्षिणेन पाणिनादाय कनिष्ठाङ्गुष्ठौ विश्लिष्टौ वितत्य तिस्र इतराङ्गुलीः संहता उर्द्ध्वाः कृत्वा ब्राह्मेण तीर्थेन हृदयप्रापि ब्राह्मणः, कण्ठप्रापि क्षत्रियः, तालुप्रापि वैश्योऽवनतशिरास्त्रिराचामेत् ।

ततः पाणिं प्रक्षाल्य स्पृष्टाम्भः आकुञ्चितोष्ठमास्यमङ्गुष्ठमूलेन द्विः प्रमृज्य संहतमध्यमाङ्गुलीभिः (तर्जनीमध्यमानामिकाभिः) पाणिं प्रक्षाल्य सव्यं पाणिं पादौ शिरश्चाभ्युक्ष्य जलं स्पृष्ट्वा कनिष्ठाङ्गुष्ठौ वितत्य संहतमध्यमाङ्गुलित्रयाग्रेणास्यमुपस्पृश्य, साङ्गुष्ठया तर्जन्या नासापुटद्वयं साङ्गुष्ठयानामिकया नेत्रयुगलं ताभ्यामेव श्रोत्रे, साङ्गुष्ठया कनिष्ठिकया नाभिं तलेन हृदयं संहताभिः सर्वाभिरङ्गुलीभिः शिरः अङ्गुल्यग्रैरंसौ संस्पृशेत् । एवं पुनर्द्विराचम्य आत्मानमभ्युक्ष्य[2] (कुशैः जलबिन्दुभिः शिरः सिञ्चेत्) । सति दन्तोच्छिष्टादौ दन्ताच्छो-

---

१—अनपाश्रितः, कुड्याद्यवलम्बनविरहितः, यद्वा न अपाश्रितो विरक्त इत्यनपाश्रितः, कार्यान्तरासक्तिरहितः ।

२—अभ्युक्ष्येति, अपोगुमेन सजलपाणिना सिञ्चेत्यर्थः ।

क्षयित्वा पुनर्द्विराचामेत् ।⊛

---

⊛ यच्चोक्तं मदनकर्मसमुच्चये केशवनारायणमाधवेति सम्बुद्ध्यन्तैस्त्रिभिर्नामभिस्त्रिरपः पिबेत्, ॐ केशवाय नमः १ नारायणाय नमः २ माधवाय नमः ३ गोविन्दाय नमः ४ विष्णवे नमः ५ मधुसूदनाय नमः ६ त्रिविक्रमाय नमः ७ वामनाय नमः ८ श्रीधराय नमः ९ हृषीकेशाय नमः १० पद्मनाभाय नमः ११ दामोदराय नमः १२ संकर्षणाय नमः १३ वासुदेवाय नमः १४ प्रद्युम्नाय नमः १५ अनिरुद्धाय नमः १६ पुरुषोत्तमाय नमः १७ अधोक्षजाय नमः १८ नारसिंहाय नमः १९ अच्युताय नमः २० जनार्दनाय नमः २१ उपेन्द्राय नमः २२ हरये नमः २३ श्रीकृष्णाय नमः २४ । एतदखिलमज्ञानविजृम्भितं केवलनामसङ्कीर्तनस्यानुक्तत्वात् । उक्तत्वाच्चैवम्—केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत् करौ । द्वाभ्यामोष्ठौ च सम्मृज्य द्वाभ्यां मृज्यान्मुखं ततः । एकेन हस्तं प्रक्षाल्य पादावपि तथैकशः । सम्प्रोक्ष्यैकेन मूर्द्धानं ततः सङ्कर्षणादिभिः । आस्य-नासाक्षिकर्णांश्च नाभ्युरस्कौ भुजौ क्रमात् । स्पृशेदेवं हि भवेदाचमनञ्च वैष्णवान्वये । गौतमीये तन्त्रे तु 'सचतुर्थीनमोन्तैश्च नामभिर्विन्यसेत् सुधीः' । निबन्धे । प्रयोगो यथा—केशवाय नमः नारायणाय नमः माधवाय नमः इत्याचामेत् । गोविन्दाय नमः इति दक्षिणकरप्रक्षालनम् । विष्णवे नमः इति वामकरप्रक्षालनम् । मधुसूदनाय नमः इति ओष्ठम् । त्रिविक्रमाय नमः इति अधरं प्रक्षालयेत् । वामनश्रीधराभ्यां नमः इति मुखमार्जनम् । हृषीकेशाय नमः इति वामकरप्रोक्षणम् । पद्मनाभाय नमः इति पाद-प्रक्षालनम् । दामोदराय नमः इति मस्तकप्रोक्षणम् । सङ्कर्षणाय नमः इत्यास्यम् ( वा ऊर्ध्वोष्ठं प्रोक्षेत् ) । वासुदेवाय नमः इति दक्षिणनासाछिद्रस्पर्शः । प्रद्युम्नाय नमः इति वामनासाछिद्रस्पर्शः । अनिरुद्धाय नमः इति दक्षिणनेत्रस्पर्शः । पुरुषोत्तमाय नमः इति वामनेत्रस्पर्शः । अधोक्षजाय नमः इति दक्षिणकर्णस्पर्शः । नारसिंहाय नमः इति वामकर्णस्पर्शः । अच्युताय नमः इति नाभिस्पर्शः । जनार्दनाय नमः इति हृदयस्पर्शः । उपेन्द्राय नमः इति मस्तकस्पर्शः । हरये नमः इति दक्षिणभुज-स्पर्शः । श्री कृष्णाय नमः इति वामभुजस्पर्शः । इति पौराणिकाचमनमिति मध्वाचार्यैः योगसारे । तारानाथस्तु गौतमतन्त्रोक्तं वैष्णवाचमनमादाभिधाने ।

एवं सपवित्रकरेणाचम्य—प्रथममन्त्रकं* पञ्चदशमात्रिकं प्राणायामत्रयं कृत्वा समन्त्रकं सकृत्कुर्यादायतप्राणः सप्रणवां सप्तव्याहृतिकां सावित्रीं सशिरसां त्रिरावर्तयेत्।

"प्रणवस्य ब्रह्मा ऋषिः दैवी गायत्री छन्दः परमात्मा देवता। सप्तव्याहृतीनां विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपा ऋषयः, प्रजापतिर्वा, गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यश्छन्दांस्यग्निवाय्वादित्यबृहस्पतिवरुणेन्द्रविश्वेदेवा देवताः।

गायत्र्या विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता।

शिरसः प्रजापतिर्ऋषिर्यजुश्छन्दो ब्रह्माग्निवाय्वादित्या देवता प्राणायामे विनियोगः"।+

ओं भूः। ओं भुवः। ओं सुवः (स्वः), ओं महः। ओं जनः। ओं तपः। ओं सत्यम्। ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। ओमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम् ( स्वरोम् )॥

तै० आ० प्र० १०। अनु० २७।

अङ्गुष्ठेन दक्षिणनासापुटं निरुद्ध्य नासिकाया वामरन्ध्रेण मन्दं मन्दं वायुमापूर्य्य तर्जन्या वामनासापुटमप्यवरुद्ध्य निरोधेन कुम्भके

* पञ्चदशमात्रिकप्राणायामस्तु पद्मासने सिद्धासने वोपविश्य अमन्त्रकमेव वारत्रयं कुर्य्यात्। अमन्त्रकप्राणायामार्थस्तु पूर्वोक्तप्राणायाममन्त्ररहितेन केवलेन प्रणवेन प्राणायामः पञ्चदशमात्रिकप्राणायामः।

+ आपो ज्योतिरित्यस्यार्षं छन्दो दैवतञ्चाह योगियाज्ञवल्क्यः। "आपो ज्योती रस इति मन्त्रो यस्तु प्रकीर्त्यते। तस्य प्रजापतिरार्षं यजुश्छन्दो विवर्जितम्। ब्रह्माग्निवायुसूर्याश्च देवताः समुदाहृताः। यजुष्ट्वाच्छन्दो नास्तीति मिश्रः।

कृते प्राणायाममन्त्रं त्रिरुक्त्वा नासादक्षिणरन्ध्रेण वायुं शनैः शनैः विसृजेत् ❀ ।

ततः "अद्येत्यादि० ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातः सन्ध्यामुपासिष्ये" इति कर्म सङ्कल्प्य शुचौ पात्रे सव्ये पाणौ वा अप आधाय स्थिरे उदकाशये वा, तीर्थानि आवाह्य सदर्भपाणिना ओं पूर्व पच्छ आपोहिष्ठेति तिसृभिः कुशैः सोदकविन्दुभिः शिरसि मार्जयेत्—

'आपोहिष्ठेति * तृचस्याम्बरीषः सिन्धुद्वीप ऋषिर्गायत्रीछन्द आपो देवता मार्जने विनियोगः ।

ॐ आपो हिष्ठा मयो भुवः ॥ १ ॥

ॐ तान ऊर्जे दधातन ॥ २ ॥

ॐ महेरणाय चक्षसे ॥ ३ ॥

ॐ यो वः शिवतमो रसः ॥ ४ ॥

ॐ तस्य भाजयतेह नः ॥ ५ ॥

ॐ उशतीरिव मातरः ॥ ६ ॥

ॐ तस्मा अरङ्गमामवः ॥ ७ ॥

---

❀ यद्यपि "प्राणस्यायमनं कृत्वा आचामेदप्रयतोऽपिसन्" इति योगियाज्ञवल्क्य-वचनन्तथापि "बह्वल्पं वा स्वगृह्योक्तं यस्य यावत् प्रकीर्तितम् । तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेदि" ति छन्दोगपरिशिष्टवाक्यात् प्राणायामोत्तरं सङ्कल्पस्तदुत्तरं मार्जनं तदुत्तरमेवाचमनमनुष्ठेयमिति । अपि च "स्वशाखाश्रयमुत्सृज्य परशाखाश्रयन्तु यः । कर्तुमिच्छति दुर्मेधा मोघं तत्तस्य चेष्टितम्" इति ।

* तिस्र ऋचो यस्मिंस्तत्तृचं सूक्तम् अत्र त्रिशब्दस्य सम्प्रसारणं ऋगित्यस्य ऋकारलोपः (ऋचि त्रेरुत्तरपदादिलोपश्च छन्दसि)। "ऋक्पूरब्धूर" इति समासान्तः अः

* ॐ यस्य क्षयाय जिन्वथ ॥ ८ ॥

ॐ आपो जनयथा च नः ॥ ९ ॥

उदकमादाय "सूर्य्यश्चे"ति पिबेत् ।

सूर्य्यश्चेति मन्त्रस्य ब्रह्मा ऋषिः प्रकृतिश्छन्दः सूर्यमन्युमन्युपतयो देवता आचमने विनियोगः । ×

सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम् । यद्रात्रिया (त्र्या) पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना । रात्रिस्तदवलुम्पतु । यत्किञ्च दुरितं मयि । इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा ।

तैत्ति० आ० । प्र० १०·अनु० २५ ।

इत्याचम्य पुनरप्यमन्त्रकं द्विराचामेत् । ततो मार्जनं कुर्यात् ।

प्रणवस्य ब्रह्मा ऋषिर्दैवी गायत्री छन्दः परमात्मा देवता । महाव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्छन्दांस्यग्निवाय्वादित्या देवताः ।

---

* ऋग्वेदिनां मार्जने "आपो यस्य क्षयाये"ति व्यासवाक्येन नांभो जलप्रक्षेपः सूत्रेऽनुक्तत्वात् ।

× अभ्यन्तरशुद्ध्यर्थे मन्त्राचमने विनियोगः इति ब्रह्मकर्मसमुच्चये पाठः । अत्र "ब्रह्मा सूर्यमन्युमन्युपतयः प्रकृतिः" इति परिशिष्टसूत्रम् । नारायणस्तु-सूर्यश्चमेत्यस्य नारायणऋषिः सूर्यो देवता अनुष्टुप्छन्दः अम्बुप्राशने विनियोगः इत्युक्तवान् । कल्याणंने "सूर्यश्चमेति हिरण्यगर्भ ऋषिमध्येऽनुष्टुबाद्यन्तयोर्जगमध्या गायत्री छन्दः सूर्यो देवता आचमने विनियोगः इत्युक्तवान् पतुर्धरः । वीरमित्रोदये तु सूर्यश्चेत्यस्य ब्रह्मऋषिः प्रकृतिश्छन्दः सूर्यो देवता अपामुपस्पर्शने विनियोगः" इत्युक्तम् ।

गायत्र्या विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता मार्जने विनियोगः।

"ओम्" इति प्रथमं मार्जनम्।

"भूर्भुवः स्वः" इति द्वितीयम्।

"तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्।"[1] इति तृतीयं मार्जनं कृत्वा "आपो हिष्ठे"ति सूक्तेन नवर्चेन ऋकशो मार्जयेत्, गायत्रीशिरसा च शिरसि मार्जयेत्।

आपो हिष्ठेति नवर्चस्य आम्बरीषः सिन्धुद्वीप ऋषिः त्वष्टपुत्र-त्रिशिरा वा इदमाप इत्यादिके द्वेऽनुष्टुभौ, ईशाना इति वर्द्धमाना आपः पृणीतेति प्रतिष्ठा शिष्टा गायत्र्यः आपो देवताः।

गायत्रीशिरसः प्रजापतिर्ऋषिर्यजुश्छन्दो ब्रह्माग्निवाय्वादित्या देवता मार्जने विनियोगः।

आपो हिष्ठा मयोभुवस्तानं ऊर्जे दधातन।
महेरणाय चक्षसे ॥ १ ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः।
उशतीरिव मातरः ॥ २ ॥
तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ।
आपो जनयथा च नः ॥ ३ ॥
शन्नो देवीरभिष्टय आपो भवन्तु पीतये।
शं योरभिस्रवन्तु नः ॥ ४ ॥

१—यद्यपि दिवाकरवासुदेवाभ्यां गायत्रीशिरसा मार्जनं नोक्तं तथापीह सूत्रे विहितत्वाद् गायत्रीशिरसाऽपि मार्जनं कर्त्तव्यम्।

ईशा॑ना॒ वार्या॑णां॒ क्षय॑न्तीश्चर्षणी॒नाम् ।
अ॒पो या॑चामि भेष॒जम् ॥ ५ ॥
अ॒प्सु मे॒ सोमो॑ अब्रवीद॒न्तर्विश्वा॑नि भेष॒जा ।
अ॒ग्निं च॑ वि॒श्वश॑म्भुव॒माप॑श्च वि॒श्वभे॑षजीः ॥ ६ ॥
आपः॑ पृणी॒त भे॑ष॒जं वरू॑थं त॒न्वे॒३॒॑ मम॑ ।
ज्योक् च॒ सूर्यं॑ दृ॒शे ॥ ७ ॥
इ॒दमा॑पः॒ प्र व॑हत॒ यत्किं च॑ दुरि॒तं मयि॑ ।
यद्वा॒हम॑भिदु॒द्रोह॒ यद्वा॑ शे॒प उ॒तानृ॑तम् ॥ ८ ॥
आपो॑ अ॒द्यान्व॑चारिषं॒ रसे॑न॒ सम॑गस्महि ।
पय॑स्वानग्न॒ आ ग॑हि॒ तं मा॒ सं सृ॑ज॒ वर्च॑सा ॥ ९ ॥

ऋ० वे० ७।६।५ ।

ओमापो॒ ज्योती॒ रसो॒ऽमृतं॒ ब्रह्म॒ भूर्भुवः॒ सुव(स्व)रोम् ।

तै० आ० १० प्र० । २७ अनु० ।

अघमर्षणम् । *

ऋतञ्चेति तृचस्य माधुच्छन्दसोऽघमर्षण ऋषिरनुष्टुप्छन्दो भाववृत्तं देवता अघमर्षणे विनियोगः ।

---

* अथ गोकर्णाकृतिना पाणिनोदकमादाय नासिकाग्रे धारयन् कृष्णपापपुरुषाकृति पाप्मानमात्मानमन्तर्देहे स्थितं विचिन्त्य संयतप्राणोऽघमर्षणसूक्तं द्रुपदामृचं वावर्त्य दक्षिणेन नासाबिलेन शनैः प्राणं रेचयन् सर्वं तस्मिन् संहृत्य कृष्णं रेचनवर्त्मना पाणिस्थ उदके पतितं ध्यात्वा तदुदकमनवेक्षमाणो वामतो भुवि शिलापातेन छित्त्वा तं पाप्मानं वज्रेणेव सहस्रधा दलितं भावयेदेव पापस्य भेदः एतमेके न कुर्वन्ति मार्जनेनैव तस्य सिद्धत्वादिति । आह्नि० परि० । आचारार्के तु 'गोकर्णाकारं जलपूर्णं पाणिं कृत्वा नासिकाग्रे नीत्वा प्राणं निरुध्य' ( ऋतञ्चेतिपठेदिति ) उक्तम् ।

ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत।
ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥ १ ॥
समुद्रादर्णवादधि संवत्सरो अजायत।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥ २ ॥
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः ॥ ३ ॥

ऋ० वे० अ० ८ व० ४८ मं० १० अ० १२ सू० १९१ ।

(यद्वा)

द्रुपदादिवेत्यस्य कोकिलो राजपुत्र ऋषिरनुष्टुपछन्दः आपोदेवता अघमर्षणे विनियोगः ।

"द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव।
पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥"

अथाचम्य दर्भपाणिः पूर्णमुदकाञ्जलिमुद्धृत्यादित्याभिमुखः स्थित्वा प्रणवव्याहृतिपूर्वया सावित्र्या त्रिस्समर्पयन् सूर्याय उत्क्षिपेद्धे पुनः पाप्मव्यपोहं नेच्छन्ति त आचम्यैवार्घ्यमुत्क्षिपेयुः ।

"ओ३म् भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ।"

श्रीसूर्यनारायणायेदमर्घ्यं समर्पयामि ।

अत्र कालातिक्रमे प्रायश्चित्तार्थं चतुर्थार्घमपि देयम् । ततः-
"असावादित्यो ब्रह्म" (तै० आ० प्र० २ अनु० २)

इति प्रदक्षिणं परिक्रमन् आत्मनः परितो जलसेकं कृत्वा न वा कृत्वा आचामेत्। दर्भाम्भसा सिक्ते देशे दर्भानास्तीर्य "ॐ भूर्भुवः

स्वः" इति जपित्वा पद्मासनेनोपविश्य पूर्ववत् प्राणायामत्रयं कृत्वा-त्मानं[1] ( हृदयं ) व्याहृतिभिः ( भूर्भुवः स्वः ) इति अभ्युक्ष्य ( अधो-मुखेन सजलपाणिना सिक्त्वा )

"गायत्र्या विश्वामित्र ऋषिर्गायत्रीछन्दः सविता देवता न्यासे विनियोगः ।"

"तत्सवितुर्हृदयाय नमः" इति हृदये ।
"वरेण्यं ( णियं ) शिरसे स्वाहा" इति शिरसि ।
"भर्गो देव शिखायै वषट्" इति शिखायाम् ।
"स्य धीमहि कवचाय हुम्" इत्युरसि ।
"धियो यो नो नेत्रत्रयाय वौषट्" इति नेत्रललाटदेशेषु विन्यस्य

"प्रचोदयादस्त्राय फट्" इति करतलयोरस्त्रं प्राच्यादिषु दशसु दिक्षु विन्यसेत् । एषोऽङ्गन्यासः । अङ्गन्यासविधिं केचिन्नेच्छन्ति ।

यदा तिसृषु सन्ध्यासु एकरूपां ध्यायेत्तदेदं ध्यानम् ।

"ऋग्यजुःसामत्रिपदां तिर्यगूर्ध्वाधरदिक्षु षट्कुक्षिं पञ्चशिरस-मग्निमुखीं विष्णुहृदयां ब्रह्मशिरस्कां रुद्रशिखां दण्डकमण्डल्वक्षसूत्राभ-याङ्कचतुर्भुजां शुभ्रवर्णां शुभ्राम्बरानुलेपनस्रगाभरणां शरच्चन्द्रसहस्रप्रभां सर्वदेवमयीमिमां देवीं गायत्रीमेकामेव तिसृषु सन्ध्यासु ध्यायेत्" ।

"अथ यदि भिन्नरूपां तां प्रातर्बालां बालादित्यमण्डलमध्यस्थां रक्तवर्णां रक्ताम्बरानुलेपनस्रगाभरणां चतुर्वक्त्रां दण्डकमण्डल्वक्षसूत्रा-भयाङ्कचतुर्भुजां हंसासनारूढां ब्रह्मदैवत्यामृग्वेदमुदाहरन्तीं भूलोका-धिष्ठात्रीं गायत्रीं नाम देवतां ध्यायेत्" ।

केचिद्ध्यानमपि नेच्छन्ति ।

---

१ आत्मनोऽधिष्ठानत्वाद्धृदयस्यात्मशब्देनात्र हृदयमुच्यते । तथा च श्रुतिः— "स वा एष आत्मा हृदि कतम ?" इति ।

अथ ध्यानं कर्त्तव्यञ्चेद् गायत्र्यादिश्रुतिप्रतिपादितस्य सूर्य्यमण्डला-न्तर्गतपुरुषस्यैव । विशेषतः ध्यानव्याख्याने द्रष्टव्यम् ।

मन्त्रदेवतां गायत्रीं ध्यात्वा—

* "आगच्छ वरदे देवि जप्ये मे सन्निधा भव ।
गायन्तं त्रायसे यस्माद् गायत्री त्वं ततः स्मृता" ॥

इत्यावाह्य नष्टेषु नक्षत्रेषु सूर्य्यमण्डलदर्शनपर्य्यन्तं मन्त्रार्थमनु-सन्दधानो गायत्रीमन्त्रं जपंस्तिष्ठेत् ।

ॐकारस्य ब्रह्मा ऋषिर्दैवीगायत्री छन्दः परमात्मा देवता । महा-व्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुपछन्दांस्यग्निवाय्वादित्या देवताः । गायत्र्या विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता जपे विनियोगः ।

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ।

जपं चाक्षसूत्रेणानामिकाया मध्यादारभ्य प्रदक्षिणं दशभिरङ्गुलीपर्वभिर्वा गणयेत्⊕ । मन्त्रं जपित्वा—

जातवेदसः कश्यप ऋषिस्त्रिष्टुपछन्दो जातवेदोऽग्निर्देवता । तच्छंयोः शंयुः ऋषिः शक्वरी छन्दः विश्वेदेवा देवताः । नमोब्रह्मणे इति प्रजापतिर्ऋषिर्जगती छन्दः विश्वेदेवा देवता उपस्थाने विनियोगः ।

---

* तैत्तिरीयारण्यके आवाहनमन्त्रस्त्विरथम्—"आयातु वरदा देवी अक्षरं ब्रह्मसम्मितम् । गायत्री छन्दसां माता इदं ब्रह्म जुषस्व नः । ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरों गायत्री-मावाहयामि । तै० आ० प्र० १० अनु० ३६ । केचिदित्यमृग्वेदिनः पठन्ति ।

⊕ असंख्यातजपे दोषदर्शनाज्जपसंख्याऽत्रैवम्—ॐपूर्वां गायत्रीमष्टकृत्व एकादश-कृत्वो द्वादशकृत्वः पञ्चदशकृत्वः शतकृत्वः सहस्रकृत्वश्च वा जपेत् । विशेषविवरणं जपसंख्याव्याख्यानेनावगन्तव्यम् ।

जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥

ऋ० वे० अ० १ अ० १५।१००।

तच्छंयोरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे शं चतुष्पदे ॥

तैत्ति० आ० ३ कां ३ प्र० ५ अनु० ११ ।

ॐ नमो ब्रह्मणे नमोऽस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे महते करोमि ॥

तै० आ० २ प्र० १२ अनु० ।

इत्येताभिरुपस्थाय* ।

ततः । प्राच्यै दिशे इन्द्राय च नमः । आग्नेय्यै दिशे अग्नये च नमः । दक्षिणायै दिशे यमाय च नमः । नैर्ऋत्यै दिशे निर्ऋतये च नमः । प्रतीच्यै दिशे वरुणाय च नमः । वायव्यै दिशे वायवे च नमः । उदीच्यै दिशे सोमाय च नमः । ईशान्यै दिशे ईश्वराय च नमः । ऊर्ध्वायै दिशे ब्रह्मणे च नमः । अधरायै दिशे अनन्ताय च नमः ।

इति प्रदक्षिणं दिशः साधिपा नत्वा—

अथ, सन्ध्यायै नमः । गायत्र्यै नमः । सावित्र्यै नमः । सरस्वत्यै नमः । सर्वाभ्यो देवताभ्यो नमः ।

इति नमस्कृत्य । ततः—

उत्तमे शिखरे देवि भूम्यां पर्वतमूर्द्धनि ।

---

* अत्र मित्रोपस्थानादिकविवरणं भाष्ये उपस्थानव्याख्यानेऽवलोकनीयम् ।

ब्राह्मणैरभ्यनुज्ञाता गच्छ देवि यथासुखम्' इति सन्ध्यां विसृज्य "भद्रं नो अपिवातय मनः" इत्युक्त्वा "ओं शान्तिः शान्तिः शान्तिः" इत्युच्चार्य—

ओं नमो ब्रह्मणे नमोऽस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः ।
नमो वाचे नमो वाचस्पतये नमो विष्णवे *महते करोमि ॥

तै० आ० प्र० २ अनु० १२ ।

इति प्रदक्षिणं परिक्रमन्—

आसत्यलोकादापातालादालोकालोकपर्वतात् ।
ये सन्ति ब्राह्मणा देवास्तेभ्यो नित्यं नमो नमः ।

इति नमस्कृत्य भूमिमुपसंगृह्य गुरून् वृद्धांश्चोपसङ्गृह्णीयात् ।

॥ इति ऋग्वेदीया प्रातःसन्ध्या पद्धतिः ।